पूर्वैषामिति” वशिष्ठस्मरणादिति चेन्न एतस्य द्व्यामुष्यायणेतरविषये सावकाशत्वात् द्व्यामुष्यायणे च हेतुवल्लिङ्गदर्शितसन्ततिविच्छेदाभावात् वेतालस्य च भैरवपुत्रपुत्रीकरणे पौराणिकलिङ्गदर्शनाच्च। यथा “ततः कदाचिदुर्वश्यां भैरवो मैथुनं गतः। तस्यां स जनयामास सुवेशं नाम पुत्रकम्। तमेव चक्रे तनयं वेतालोऽपि स्वकं सुतम्। ततस्तौ तेन पुत्रेण स्वर्ग्यां गतिमवापतुरिति”।

केन पुत्रो देय इत्याह शौनकः “नैकपुत्रेण कर्त्तव्यं पुत्रदानं कदाचन। बहुपुत्रेण कर्त्तव्यं पुत्रदानं प्रयत्नतः” इति। द्विपुत्रस्यापि पुत्रदाने अपरपुत्रनाशे वंशविच्छेदमाशङ्क्याह बहुपुत्रेणेति। स्त्रियास्तु जीवति भर्त्तरि तदनुमतौ, प्रोषिते मृते वा तदनुज्ञां विनापि यथाह वशिष्ठः। “न तु स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्त्तुरिति”। अनुमतिश्च अप्रतिषेधेऽपि भवति “अप्रतिषिद्धं परमतमनुमतं भवतीति” न्यायात्। निरपेक्षदानमाह याज्ञवल्क्यः “दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्”। तथा। “मातापितृभ्यामुत्सृष्टस्तयोरन्यतरेण वेति”।

अथ पुत्रपरिग्रहविधिमाह शौनकः “शौनकोऽहं प्रवक्ष्यामि पुत्रसंग्रहमुत्तमम्। अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च। संग्रहं संग्रहणविधिम्। उपोष्य ग्रहणात् पूर्वदिने कृतोपवासः। इदृगौतमः “वाससी कुण्डले दत्त्वा उष्णीषञ्चाङ्गुलीयकम्। आचार्य्यं धर्म्मसंयुक्तं वैष्णवं वेदपारगम्। मधुपर्केण सम्पूज्य राजानञ्च द्विजान् शुचीन्”। राज्ञो विप्रकृष्टत्वे ग्रामस्वामिनम् “बन्धूनाहूय सर्वांस्तु ग्रामस्वामिनमेव च” इति स्मरणात्। द्विजानिति बहुत्वं त्रित्वपर्य्यवसितं कपिञ्जलन्यायात्। द्विजानां पूजनं याचनार्थम्। “बर्हिः कुशमयञ्चैव पालाशं चेध्ममेव च। एतानाहृत्य बन्धूंश्च ज्ञातीनाहूय यत्नतः। बन्धूनन्नेन सम्भोज्य ब्राह्मणांश्च विशेषतः। अन्वाधानादिकं तत्र कृत्वाज्योत्पवनान्तकम्। दातुः समक्षं गत्वा च पुत्रं देहीति याचयेत्। दाने समर्थो दातास्मै “ये यज्ञेनेति पञ्चभिः”(१)। दद्यादिति शेषः। बन्धूनात्ममातृपितृबन्धून्। ज्ञातीन् सपिण्डान्। तदाह्वानं दृष्टार्थम् बन्धूनाहूतान् ब्राह्मणान्, पूर्वोक्तान्। चकारात् आहूतान्, ज्ञातींश्च सम्भोज्येत्यर्थः। तथा “देवस्यत्वेति”(२)मन्त्रेण हस्ताभ्यां परिगृह्य च। अङ्गादङ्गेत्यृचं (३)जप्त्वा आघ्राय शिशुमूर्द्धनि। वस्त्रादिभिरलङ्कृत्य पुत्रच्छायावहं सुतम्। पुत्रच्छाया पुत्रसादृश्यं नियोगादिना(४)स्वयमुत्पादनयोग्यत्वमिति यावत्। तथा “नृत्यगीतैश्च वाद्यैश्च स्वस्तिशब्दैश्च संयुतम्। गृहमध्ये तमाधाय चरुं कृत्वा विधानतः। यस्त्वाहृदेत्यृचा(५) चैव तुभ्यमग्रेत्यृचैकया(६)। सोमोऽददिद्येताभिः(७) प्रत्यृचं पञ्चभिस्तथेति”।

(अत्र प्रतीकसूचिताः ऋचः प्रायशोऽनेकेषां तत्स्वरूपाज्ञानात् तेषां प्रबोधाय वेदादुद्धृत्य प्रदर्श्यन्ते। (१) “ये यज्ञेन दक्षिणया समक्ता इन्द्रस्य सख्यममृतत्वमानश। तेभ्यो भद्रमङ्गिरसो वो अस्तु प्रतिगृभ्णीत मानवं सुमेधसः” ऋ०१०।६२।१। “य उदाजन् पितरो गोमयं वस्वृतेनाभिन्दन् परिवत्सरे वलम्। दीर्घायुत्वमङ्गिरो वो अस्तु प्रतिगृभ्णीत मानवं सुमेधसः। २। य ऋतेन सूर्य्यमारोहयन् दिव्यप्रथयन् पृथिवीं मातरं वि। सुप्रजास्त्वमङ्गिरसो वो अस्तु प्रतिगृभ्णीत मानवं सुमेधसः। ३। अयं नाभा वदति वल्गु वो गृहे देवपुत्रा ऋषयस्तच्छृणोतन। सुब्रह्मण्यमङ्गिरसो वो अस्तु प्रतिगृभ्णीत मानवं सुमेधसः। ४। विरूपास इदृषयस्त इद्गम्भीरवेपसः। ते अङ्गिरसः सूनवस्ते अग्नेः परिजज्ञिरे” ५। (२) “देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि” यजु० १।२। (३) “अङ्गादङ्गं सम्भवसि हृदयादधिजायसे। आत्मा वै पुत्रनामासि संजीव शरदां शतम्”। (४) “नियोगादिनेति आदिना विवाहसंग्रहः। दुहितृभगिनीप्रभृतीनां विवाहयोग्यत्वाभावात् अर्थतएव तत्सिद्धौ विरुद्धसम्बन्धोपलक्षणार्थमित्युक्तिरपि विवाहयोग्यत्वाभावसूचनार्थं शूद्रादेर्दौहित्रादिप्रतिग्रहार्थञ्चातस्तेषां पृथग्ग्रहणमिति बोध्यम्)। (५) (“यस्त्वा हृदा कीरिणा मन्यमानोमर्त्यं मर्त्यो जोहवीमि। जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम” ऋ०५।४।१०। (६) “तुभ्यमग्रे पर्य्यवहन्त्सूर्य्यां वहतुना सह। पुनः पतिभ्यो जायां दा अग्ने! प्रजया सह” ऋ०१०।८५।३८। (७) “सोमोऽददद्गन्धर्वाय गन्धर्वोऽददद्ग्नये। रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम्” ऋ० १०।८५।४१। “इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम्। क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे” ४२।